# स्मृतिसौरभम्

आनन्दगङ्गा वहतीव यत्र

सौन्दर्यसिप्रा सरतीव यत्र ।

बन्धुत्वसिन्धुश्चलतीव यत्र

संस्कारशुद्धोऽस्ति स वो विभागः ।।१।।

विलोक्य विद्यां प्रति कर्मनिष्ठां

चेष्टां च सर्वां निजनेत्रकान्त्या ।

जातं हि चित्तं सुखमण्डितं मे

विद्या यतो मे जननीव जीर्णा ।।२।।

शुभ्रा सुचित्रा सरला सुभद्रा

विभागदायित्वनगाधिरूढा ।

बन्धुत्वविद्याविषये प्रवीणा

तां भारतीं स्नेहवतीं स्मरामि ।।३।।

या माधवी माधवभावसिक्ता

सदानुरक्ताऽध्ययनेऽतिशान्ता ।

विद्योतते या प्रतिभेव साक्षात्

सा स्नेहमूर्तिर्मनसि स्थिताऽस्ति ।।४।।

या भास्वती भावमयी विनम्रा

नम्रा यथा कोमलकाव्यवल्ली ।

शकुन्तला शान्तसमुद्रशोभा

सा ज्ञानशुभ्रास्ति विभागरत्नम् ।।५।।

या हर्षदा शीतलचन्द्रकान्तिः

विद्यावती ज्ञानपयोधिपूता ।

संशोधनाय प्रकरोति यत्नं

तां हर्षदां हर्षनिभां स्मरामि ।।६।।

मृणालिनी या मधुरस्वभावा

प्रयत्नशीला कुशला कलाश्रीः ।

प्रशान्तभावारुणरक्तदेहा

तां ज्ञानमित्रं स्मरतीह चित्तम् ।।७।।

विद्यार्थिनो यत्र विशुद्धचित्ताः

ज्ञानप्रियाः सन्ति च भासते माम् ।

विज्ञाय तेषां सहजां प्रवृत्तिं

मयानुभूतं मधुरत्वमेव ।।८।।

दृष्टं मया तत्र मनोज्ञभावं

परस्परप्रेमपरागसिक्तम्।

स्मृतिर्मनोज्ञा तटिनीयते मे

तत् सौरभं सिन्चितुमेव कामी ।।९।।

आसीच्च तत्राखिलशान्तिधारा

विज्ञानविद्योतकदीपरश्मिः।

सौहार्द्यस्नेहामृतमोहमल्ली

मनःसुमं मे स्फुटितं ततोऽद्य ।।१०।।

(उपजातिवृत्तेन विरचितम्)

**रचयिता : रवीन्द्रकुमारः पण्डा**